# ॥ श्रीमन्त्रराजपदस्तोत्रम् ॥

वृत्तोत्फुल्ल-विशालाक्षं विपक्षक्षय-दीक्षितम् ।
निनादत्रस्त-विश्वाण्डं विष्णुमुग्रं नमाम्यहम् ॥ १ ॥

सर्वैरवध्यतां प्राप्तं सबलौघं दितेः सुतम् ।
नखाग्रैः शकलीचक्रे यस्तं वीरं नमाम्यहम् ॥ २ ॥

पादावष्टब्धपातालं मूर्धाविष्ट-त्रिविष्टपम् ।
भुजप्रविष्टाष्टदिशं महाविष्णुं नमाम्यहम् ॥ ३ ॥

ज्योतींष्यर्केन्दु-नक्षत्र-ज्वलनादीन्यनुक्रमात् ।
ज्वलन्ति तेजसा यस्य तं ज्वलन्तं नमाम्यहम् ॥ ४ ॥

सर्वेन्द्रियैरपि विना सर्वं सर्वत्र सर्वदा ।
जानाति यो नमाम्याद्यं तमहं सर्वतोमुखम् ॥ ५ ॥

नरवत् सिंहवच्चैव रूपं यस्य महात्मनः ।
महासटं महादंष्ट्रं तं नृसिंहं नमाम्यहम् ॥ ६ ॥

यन्नामस्मरणाद् भीताः भूतवेतालराक्षसाः ।
रोगाद्याश्च प्रणश्यन्ति भीषणं तं नमाम्यहम् ॥ ७ ॥

सर्वोऽपि यं समाश्रित्य सकलं भद्रमश्नुते ।
श्रिया च भद्रया जुष्टो यस्तं भद्रं नमाम्यहम् ॥ ८ ॥

साक्षात् स्वकाले संप्राप्तं मृत्युं शत्रुगुणानपि ।
भक्तानां नाशयेद्यस्तु मृत्युमृत्युं नमाम्यहम् ॥ ९ ॥

नमस्कारात्मकं यस्मै विधायाऽऽत्मनिवेदनम् ।
त्यक्तदुःखोऽखिलान् कामान् अश्नुते तं नमाम्यहम् ॥ १०

दासभूताः स्वतः सर्वे ह्यात्मानः परमात्मनः ।
अतोऽहमपि ते दास इति मत्वा नमाम्यहम् ॥ ११ ॥

शङ्करेणादरात् प्रोक्तं पदानां तत्त्वमुत्तमम् ।
त्रिसन्ध्यं यः पठेत् तस्य श्रीर्विद्यायुश्च वर्धते ॥ १२ ॥